# Nilakarnakritam Balakrishna Stotram

# નીલકર્ણકૃતં બાલકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Nilakarnakritam Balakrishna Stotram

File name : nIlakarNakRRitaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 164/26-54||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# નીલકર્ણકૃતં બાલકૃષ્ણસ્તોત્રમ્

પ્રણનામ મુહુઃ કૃષ્ણં બાલકૃષ્ણં પરેશ્વરમ્ ।
વૃકાયનો મહર્ષિશ્ચ સ્તોત્રં ચકાર વૈ હરેઃ ॥ ૨૬॥

પૂજનં પ્રચકારાऽસૌ શાલવૃક્ષદલૈસ્તદા ।
વૃષ્ટિજલૈર્મનોભાવૈઃ પુપૂજ પરમેશ્વરમ્ ॥ ૨૭॥

યેન રક્ષા કૃતાऽऽરમ્ભે બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
તેન ત્વયાऽત્ર મે રક્ષા કૃતા તુભ્યં નમો નમઃ ॥ ૨૮॥

યેન રક્ષા કૃતા પૂર્વં સત્યવ્રતસ્ય સાગરે ।
તેન ત્વયાऽત્ર મે રક્ષા કૃતા તુભ્યં નમો નમઃ ॥ ૨૯॥

યેનાબ્ધિમન્થને રક્ષા બહૂનાં વૈ કૃતા પુરા ।
યેન દેવા રક્ષિતાશ્ચ દૈત્યાસ્તુ વિનિપાતિતાઃ ॥ ૩૦॥

યેન દુગ્ધા મેદિની ચ રક્ષિતાઃ પ્રાણિનઃ પુરા ।
યેન સાગરતલગા રક્ષિતા વૈ ક્ષિતિઃ પુરા ॥ ૩૧॥

યેનાऽઙ્ગુષ્ઠજલેનૈતદ્બ્રહ્માણ્ડં પાવનં કૃતમ્ ।
તેન ત્વયાऽત્ર મે રક્ષા વિહિતા તે નમોऽસ્તુ ચ ॥ ૩૨॥

યેન ધ્રુવશ્ચ પ્રહ્લાદો રક્ષિતૌ બાલકૌ પુરા ।
યેન બાણાસુરશ્ચાત્ર ઘાતિતઃ પરમાત્મના ॥ ૩૩॥

તલાજા રક્ષિતા યેન મોક્ષિતા શરણાગતા ।
દૈત્યો દમનકો યેન મોક્ષિતઃ પરમાત્મના ॥ ૩૪॥

કઙ્કુતાલા મોક્ષિતાશ્ચ નારકા મોક્ષિતાસ્તથા ।
સાલમાલો નાશિતશ્ચ યેન તેનાऽવિતોऽસ્મિ ચ ॥ ૩૫॥

બાલાઃ પ્રમોક્ષિતા યેન રાજ્યમાતા પ્રમોક્ષિતા ।
વલ્લીદીનો નાશિતશ્ચ વરાટકો વિનાશિતઃ ॥ ૩૬॥

વનસ્પત્યાદયો યેન રક્ષોભાવાદ્વિમોચિતાઃ ।
દેવાયનસમુદ્ધારશ્ચાણ્ડાલયોનિતઃ કૃતઃ ॥ ૩૭॥

કન્થાધરઃ કૃતો યેન ચિરઞ્જીવોઽપિ વૈ તતઃ ।
રણઙ્ગમેન પુત્રેણ તારિતો યેન શાર્ઙ્ગિણા ॥ ૩૮॥

માઁજામ્બિકા રક્ષિતા ચ મ્લેચ્છા વિનાશિતાસ્તથા ।
રક્તબીજો નાશિતશ્ચ યેન તેનાઽવિતોઽસ્મ્યહમ્ ॥ ૩૯॥

જલમગ્નો નૃપતિશ્ચ રક્ષિતો હ્યુદયાભિધઃ ।
વસુમેધો રક્ષિતશ્ચ જલે યેન નમોઽસ્તુ તે ॥ ૪૦॥

જ્યામઘસ્તારિતો યેન ચૌરેભ્યઃ સુધનોઽવિતઃ ।
ત્ર્યષ્ટકારુર્મોક્ષિતશ્ચ યેન તુભ્યં નમોઽસ્તુ તે ॥ ૪૧॥

હિરણ્યકેશશિષ્યાશ્ચ સજીવા યેન વૈ કૃતાઃ ।
વૃહદ્વર્યાસ્તારિતશ્ચ બલેશ્વરોઽપિ મોક્ષિતઃ ॥ ૪૨॥

જયધ્વજો મોક્ષિતશ્ચ યેન તુભ્યં નમોઽસ્તુ મે ।
ઐલવિલા તારિતા ચાઽધર્મજીવો વિનાશિતઃ ॥ ૪૩॥

મહામારી નાશિતા ચ મૃતા યેન તુ જીવિતાઃ ।
ઉષ્ણાલયપ્રજા વારિમૃતા યેન પ્રજીવિતાઃ ॥ ૪૪॥

ચક્રવાક્યૈ જલં યેન ગિરિશ◌ૃઙ્ગે સમર્પિતમ્ ।
માર્જારીબાલકા યેન વહ્નિભ્રાષ્ટ્ર્યાં પ્રરક્ષિતાઃ ॥ ૪૫॥

કિમ્પુરુષપ્રદેશાશ્ચ પ્રાગ્જ્યોતિર્ભૂપ્રદેશકાઃ ।
યજ્ઞાદ્યૈઃ પાવિતા યેન તસ્મૈ તુભ્યં નમો નમઃ ॥ ૪૬॥

સમીરણોઽવિતો યેન પવમાનોઽપિ રક્ષિતઃ ।
સન્તારણોઽવિતો યેન તસ્મૈ તુભ્યં નમો નમઃ ॥ ૪૭॥

દેવાયતનકો યેન રક્ષિતઃ પરમાત્મના ।
પ્રેતોદ્ધારઃ કૃતો યેન રાશિયાનેષુ શાર્ઙ્ગિણા ॥ ૪૮॥

શૂરજારો મોક્ષિતશ્ચ પિશાચ્યો મોક્ષિતાસ્તથા ।
ધનમેદો મોક્ષિતશ્ચ યેન તુભ્યં નમો નમઃ ॥ ૪૯॥

વોઢુર્વિજ્ઞાનવાન્ યેન કૃતો ગા રક્ષિતાસ્તથા ।
બાલકૃષ્ણાય તે લક્ષવારં મેઽસ્તુ નમો નમઃ ॥ ૫૦॥

મમ યોગેન ભગવન્ ચાત્વાલોડયં સમુદ્ધૃતઃ ।
તસ્મૈ દયાલુદેવાય કોટિવારં નમો નમઃ ॥ ૫૧॥

નિવારયાઽતિવૃષ્ટિં ચ મેઘાન્ પ્રવારય પ્રભો ।
સમાવેશય પૂરાઽપો રક્ષ મગ્નાન્ હિ દેહિનઃ ॥ ૫૨॥

ઇત્યુક્ત્વા સર્જપત્રાણિ ન્યક્ષિપન્મસ્તકે હરેઃ ।
હરિં શઙ્ખં તદા દધ્મૌ મેઘાઃ શીઘ્રં તુ ઘોષતઃ ॥ ૫૩॥

વ્યદીર્યન્ત જલાનાં ચ વર્ષણં વિલયં ગતમ્ ।
જલાનિ જલપૂરાશ્ચ વ્યલીયન્ત નિનાદતઃ ॥ ૫૪॥

પ્રાણિનઃ સુખિનો જાતા વૃકાયનપ્રસઙ્ગતઃ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧૬૪-અધ્યાયાન્તર્ગતં
નીલકર્ણકૃતં બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧૬૪/૨૬-૫૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 164/26-54..

Proofread by PSA Easwaran

*Nilakarnakritam Balakrishna Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*